26-04-2021

अनिवार्यपत्रम्
साहित्यम्
व्याकरण के छात्र हेतु।

शास्त्री II

रघुवंशम्।

" वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन मञ्चम्।
शिलाविभङ्गैर्मृगराजशावस्तुङ्गं नगोत्सङ्गमिवारुरोह॥"

महाकविकालिदासरचितस्य रघुवंशमहाकाव्यस्य षष्ठसर्गात् उद्धृतोऽयं श्लोकः।

कविरत्र स्वयंवरस्थलगतस्याजस्य मञ्चारोहण-प्रकारं सिंहशिशोरिव प्रतिपादयति। राजकुमारः अजः विदर्भराजसङ्केतितेन सोपानपथेन समुन्नतं पर्यङ्कं तथैव आरूढवान् यथा सिंहशिशुः उन्नतपाषाणानुक्रमैः समुन्नतं गिरिशिखरमधिरोहति।

अन्वयः → असौ कुमारः वैदर्भनिर्दिष्टं मञ्चं क्लृप्तेन सोपानपथेन मृगराजशावः शिलाविभङ्गैः तुङ्गं नगोत्सङ्गम् इव आरुरोह।

शब्दार्थः व्याकरणञ्च → असौ = एषः। कुमारः = अजः, रघुपुत्रः। वैदर्भनिर्दिष्टम् → विदर्भस्य राजा वैदर्भः, तेन (वैदर्भेण) निर्दिष्टः वैदर्भनिर्दिष्टः, तम् वैदर्भनिर्दिष्टम्। क्लृप्तेन = रचितेन। सोपानपथेन = आरोहणमार्गेण। मृगराजशावः = सिंहशिशुः। शिलाविभङ्गैः = पाषाणभङ्गीभिः। तुङ्गम् = समुन्नतम्। नगोत्सङ्गम् = पर्वतशिखरम्। इव = यथा। आरुरोह = आरोहणं कृतवान्। कुमारः → कुत्सितो मारो येन सः, कुमारः। अत्र शृङ्गारप्रधानकाव्ये वीररसप्राधान्यम्। वैदर्भीरीतिः। माधुर्य गुणः। उपमालङ्कारः। उपजातिवृत्तम्।


26-04-2021

डॉ० निर्मलकुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ

अनिवार्यप्रथमपत्रम् । शास्त्री I २६-०४-२१

(साहित्य प्रतिष्ठा) व्याकरणेतरछात्रेभ्यः ।

पारिभाषिक शब्दाः →

1. सवर्णम् → "तुल्यास्यप्रयत्नं सवर्णम् ।"
येषां वर्णानां कण्ठादिगतोच्चारणस्थानं तथा च आभ्यन्तर-यत्नं, द्वावपि समानौ भवतः, ते वर्णाः परस्परं सवर्णं भवन्ति
यथा → अ एवम् आ । इ एवम् ई । उ एवम् ऊ ।
ऋ एवं ऌ अपि ( ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्

२. अनुनासिक → मुखनासिकावचनोनुनासिकः ।

3. अवसानम् → विरामोऽवसानम् ।
वर्णानामभावोऽवसानसंज्ञः स्यात् । यथा → रामः
अत्र अन्त्य रकारात् वर्णाभाव अतएव अन्त्य रकारवस्य उच्चारणाभावः तस्मात् अन्त्य रकारस्य अवसान संज्ञा

4. संहिता → "परः सन्निकर्षः संहिता ।"
वर्णानामतिशयितः संनिधिः संहितासंज्ञः स्यात्
यथा → हिम + आलयः, इत्यस्मिन् स्थितौ मकारोत्तरवर्ती अकारः तथा आलयस्य 'आ' परस्परं अत्यधिकं निकटौ स्तः अतएव इत्ययोः अत्यन्त सामिप्यं संहिता संज्ञकः भवति । वस्तुतः संहिता 'सन्धि' इत्यस्य अपरं नाम ।

शिष्टं अपरेद्युः ।

[signature] २६-०४-२१

डॉ० निर्मलकुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णिया

25-04-2021

अनिवार्यप्रथमपत्रम्। उपशास्त्री

संस्कृतानुवादः →

कल मैं कह रहा था कि हिन्दी भाषा वियोगात्मक है जबकि संस्कृत संयोगात्मक। इसका तात्पर्य है कि हिन्दी में कारक विभक्ति तथा क्रिया विभक्ति चिह्न शब्द से जुड़े नहीं होते हैं बल्कि शब्द से हट कर बाद में प्रयुक्त होते हैं। जैसे- राम ने रोटी खाई। इस वाक्य में कर्ता का 'ने' चिह्न (विभक्ति) शब्द राम से हटकर प्रयुक्त हुआ है। इस वाक्य का कर्म रोटी है, यहाँ कर्म का 'को' चिह्न लुप्त है। 'खाना' क्रिया का भूतकालिक चिह्न था, थी, थे आदि लुप्त है। संस्कृत में विभक्ति चिह्न शब्द से जुड़े होते हैं। जब शब्द के साथ विभक्ति जुड़ जाती है तब वे 'पद' कहलाते हैं। संस्कृत के वाक्यों में पदों का प्रयोग होता है न कि विभक्ति रहित शब्द का।

यथा → रामः कलमेन पत्रं गृहे लिखति।

इस वाक्य में कर्ता पद रामः है जिसमें प्रथमा विभक्ति, एकवचन की 'सु' विभक्ति जुड़ी है → राम + सु = रामः।

कलमेन में तृतीया एकवचन की विभक्ति 'टा' जुड़ी है।

पत्रं में द्वितीया एकवचन की विभक्ति 'अम्' है।

गृहे में सप्तमी एकवचन की विभक्ति 'ङि' है।

कारक विभक्ति 'सुप्' कहलाती हैं। इसी वाक्य में 'लिखति' क्रियापद में 'तिङ्' विभक्ति लट्लकार प्रथम पुरुष एकवचन में 'तिप्' जुड़ी है।

25-04-21

शेष अगले दिन।

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

साहित्य (प्रतिष्ठा)  शास्त्री III  26-04-2021

अष्टम पत्रम् ।  मालविकाग्निमित्रम् ।  श्लोकव्याख्या ।

" देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषम्
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधकम् ॥ "

प्रसङ्गादि पूर्ववत् । यथा नाट्याचार्य गणदासस्य-उक्तिः ।

अन्वयः → मुनयः इदं देवानां कान्तं चाक्षुषं क्रतुं आमनन्ति, रुद्रेण इदं उमाकृतव्यतिकरे स्वाङ्गं द्विधा विभक्तम् । अत्र त्रैगुण्योद्भवं नानारसं लोकचरितं दृश्यते, नाट्यं भिन्नरुचेः अपि जनस्य बहुधा एकं समाराधनम् (अस्ति) ।

शब्दार्थाः व्याकरणञ्च → मुनयः → नाट्यशास्त्रप्रवर्तकाः भरत-मतङ्गादयो ऋषयः । इदम् = नाट्यम् । देवानाम् = इन्द्रादीनां सुराणाम् । शान्तम् = सौम्यम् । चाक्षुषम् = चक्षुषा अनुभाव्यम् । क्रतुम् = यज्ञम् । आमनन्ति = उपदिशन्ति । रुद्रेण = शङ्करेण । उमाकृतः = पार्वत्या सम्पादितः । व्यतिकरः = सम्बन्धो यस्य सः तस्मिन् । स्वाङ्गे = आत्मशरीरे । द्विधा = लास्यताण्डवरूप-प्रकारद्वयेन विभक्तम् । त्रैगुण्योद्भवम् = त्रयाणां गुणानां समाहारः त्रिगुणम्, त्रिगुणमेव त्रैगुण्यम् तस्माद् उद्भवः यस्य तत् । लोकचरितम् = मानवाचरणम् । नानारसम् = विभिन्नरसयुक्तम् । दृश्यते = ज्ञायते । भिन्नरुचेः = विविधाभिलाषस्य । बहुधा = प्रायः । एकम् = अद्वितीयम् । समाराधनम् = मनोरञ्जनम् ।

26-04-21

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।